वृद्धि

गूढनं त्लेशाः तेन सा॰स्ववर्त्तनप्रतिसल्लेशं ॥ किरातं स्तौति ॥२॥ विविक्तेति ॥ अननं पुण्यकर्मयेस्तो अं
अननतपुण्यकर्मणां एवंविधा सरस्वती न प्रवर्त्तते ॥ मुखान्न प्रसरति ॥ किंविधा ॥ विविक्तवर्णाभ-
रणा ॥ पुनः किंभूता ॥ सुखश्रुतिः ॥ पुनः किंभूता ॥ द्विषतां अपि हृदयानि प्रसादयंती ॥ पुनः किं वि-
धा प्रसन्नगंभीरपदा ॥ अत्र काविलनायका वा देवता प्रतीयते ॥ विविक्ता संयोगादिना अश्लि-
ष्टा वर्णा अक्षराण्येव आभरणानि यस्याः सा ॥ विविचित्रे सिपाठे ॥ विचित्राः नानाप्रकारा वर्णानि
एव आभरणानि यस्याः ॥ अन्यत्र विचित्रवर्णैर्नानारत्नानि आभरणानि यस्याः सा ॥ सुखयतीति
सुखा ॥ सुखा श्रुतिः आकर्णनं यस्याः सा ॥ अन्यत्र श्रूयते सा श्रुतिः वाक् सुखा सुखकारिणी श्रुतिर्वा
कृयस्याः सा ॥ मंजुभाषिणी ॥ स्वर्थः द्विषामपि हृदयानि प्रसादयंती ॥ किं सुहृदामिति भावः ॥ अन्यत्र प्रस-
दयंती प्रसन्नां कुर्वती ॥ प्रसन्नानि प्रसिद्धार्थानि गंभीराणि सामिप्रायाणि पदानि सुप्तिङंतरूपा-
णि यस्याः सा ॥ अन्यत्र प्रसन्नानि विमलानि गंभीराणि अमंजुसानि स्खलनादिरहितानि चरणानि
यस्याः सा ॥ एवंविधा सरस्वती न प्रवर्त्तते अन्यत्रापि सुखेनायाती त्यर्थः ॥ भवद्वाणी वैवंविधा भिन्नसौ
भवानिति भावः ॥३॥ किं च ॥ भवंतीति ॥ ये मनोगतं अर्थं नाविनिवेशयंति वाचानुसारं तिते वि-
पश्चितां विदुषां मध्ये सत्यतमाः भवंति ॥ ननु सर्वेपि मनोगतं निवेशयंत्येवेत्याह ॥ तेष्वपि मध्ये कति

Checked 2012

ACC.NO. M1341
Title – किरातार्जुनीयम् (13 सर्ग)
Author – भारवी
Subject – काव्य
Folios – 10

विदेवं विपश्चितः गभीरं अर्थं निगूढं प्रकाशतां स्फुटतां नयंति॥ किंविधाः उपपन्ना निपुणाः सम्य
क्साधवः सम्याः अतिशयेन सम्याः सम्यतमाः॥ विपश्चितां विदुषां मनोगतं हृदयस्थं वा विनिवेश्य
यंति स्फुटं वदंतीत्यर्थः॥ ते तु विपश्चितस्तु उपपन्नं प्राप्तं निपुणां कौशल्यं येषां ते उपपन्ना [illegible] निपुणाः
प्रकाशतां नयंति॥ ग्राहयंति। मनोगतं स्फुटं वदंति लोके तावत् ज्ञानार एव दुर्लभाः तत्रापि वक्तारः
तत्रापि निगूढप्रकाशकाः त्वपि सर्वमस्तीति। तस्मान्म वाक्य सम्यतम इत्यर्थः॥ भास्कन्तिरंतिरति॥
किंवकेवितु गवाम भिधेयसंपदं अर्थसंपदं अर्थसंपत्तिं स्तवंति॥ अपरे विपश्चितः उक्ते शब्दस्य
स्तुतं सामर्थ्यं स्तवंति रतिप्रतिपोरूपं रुत्वो पीतो स्थितायां अवस्थितायां सर्वमनोरमा सर्वेषां
शब्दार्थरूलितां तुं सां मनोरमाः गिरः सुदुर्लभाः तु फिरस्त सर्वमनोरमाः उक्तो मयगुणसंपत्स्त्यति
भावः॥४॥ समस्येति॥ धुरं वहतीति धूर्यः कार्यनिर्वाहकः धुरोच्छकाति त्रियस्त प्रत्ययः॥ अतए
व समारोपित भारस्वामिना मिन्दिसंध्यादि कार्यभाराय दास्मतुः हूतसंधि विपर्ययाविति
ह मां शांतता विनयपोगिमान समित्यादि कां भारतीं वाचं गुणो विविक्तवर्णादि त्वादि तिभ
वः॥ समस्य संयोस्य प्रगल्भं निश्चकं यथा तथा संपादयता अस्माहरते त्यर्थः त्वया वनेचरेण
पिसतेत्यर्थः अपि शब्दो विरोधद्योतनार्थ आत्मा स्वयं वाग्मिनी वाचो युक्तिपटूनां। वाचो युक्ति

यद्वीक्ष्य स्मरः ॥ वाग्मिभिरिति मत्वर्थीयो ग्मिनिप्रत्ययः ॥ धुर्ये अधिरोपितः आस्थापि
तः इत्यर्थः । दृढः पोन्यतरस्यामिति पकारः ॥ अत्र मनुः । वद्धुक्कामाचीन भीवा ग्मीभूतो राज्ञः प्रशा
स्यते इति ॥ ६ ॥ वाग्मिनामेवाह ॥ प्रयुङ्क्ते इति । हे दूत त्वया प्राग्नन्तरा विनययोगि इत्यादिना सा
मसांत्वं उपयं प्रयुक्ता विलोमनं वा । वरितं दर्शितमित्यर्थः । तासपूर्वलोमोदर्शितः इत्यर्थः । मि
त्रमिष्टमुपकारसंपदित्यादिना तथा धियः कुबेरविभेदाय व्याहतये इत्यर्थः । शाक्तिरथप
ति षु इत्यादिना भयं प्रदर्शितं । किंच शिलीमुखार्थिनात्वे बाणार्थिना तन्मयार्थिना इति भा
वः । प्रये इति शेषः । नात्रियो क्रुमित्यादिना तथा नियुक्तं यथा इतरेतरन्यायाद अन्यत्र अन्यायमित्य
र्थः न्यायं मिरन्यायादनापन्नमिव अवभासते ॥ इत्युपमा । अनेन वाग्मिना मयैव रोसि इति भा
वः ॥ ७ ॥ ततः किमतः आह विरोधीति हे दूत भवता धूर्येतो तिभावः त्वया सम्भूपतिः युष्मद्राजा
किं त्वं वारितः । किमिति निमिषिद्धः ॥ निषेधे किं कारणमित्याह । किं त्वन्यः । सिद्धेः फलस्य विरो
धिघातकमिति इदं अस्मदास्कंदनरूपं कार्यं कर्तुं उद्यतः उद्यमयुक्तः । निवारणे हेतुमाह । अ
नुज्ञी विनासेवकेन भूपतिर्नृपः स्वामीति नियोज्यः नियम्यः किल हितोन अनुज्ञां विना भूमि
मिच्छता त्वमुत्र श्रेयोर्थिना । भूतिर्भस्मनि संपदीत्यमरः । पुनः किंलक्षितो मासनार्थमाश्रेय । सहयो

६

तौ सामर्थ्यशालिनौ भूतावर्थनाशौ स्वार्थानार्थौ यस्य तेन सनार्थनाशेन समानदुःखेनेत्यर्थः ॥ ख
लु अन्यथा स्वामि सिद्धान्त हीयमानकी श्रेयस स्वश्रेष्ठः स्यादिति भावः ॥ ८ ॥ तद्धितो बालः कृतः किमत्र न्याय्यं
तत्राह । ध्रुवमिति । हे दूत प्रहितस्य पत्रिणः बाणस्य शरस्य प्रगाण्डाः ध्रुवं निश्चितं । प्रहितस्येवि
ति भावः तस्य पत्रिणः शिलीमुखे विमर्शणं अन्वेषणं नयः न्याय्यः अन्वेषणं निवयनं मार्गणं
मृगणा मार्ग इत्यमरः । अत्र विषये आर्यजनातिलंघनं सज्जनव्यतिक्रमो न युक्तं ॥ तत्र सति किं भ
वति इत्याह । हि यस्मात्सतामतिक्रमः साधुजनामतिक्रमः ॥ अपायमनर्थं दिशति ददाति ॥
अत एव अविचारितं न वक्तव्यमिति भावः । अत्रार्थान्तरन्यासोलंकारः ॥ ९ ॥ यदुक्तं हर्तुं महीमि
इति तत्रोत्तरमाह ॥ अतीतेति ॥ अस्मिन्नावत्यां नाम अतीतसंख्याः अतीताः अतिक्रांताः
संख्या येभ्यस्ते अतीतसंख्याः शिलीमुखाः बाणाः विहिताः दत्ता इत्यर्थः । किमिति दत्ता इ
त्याह । किं कर्तुं इच्छता । खांडवं मत्तुमिच्छता ॥ भक्षयितुमिच्छता ॥ खांडवदाहे अक्षयतूणीद
त्तं मारतेरुक्तं ॥ अतो अमरसायकेष्वपि देवबाणेष्वपि अनादृतस्य आस्थारहितस्य मेवेत्यर्थः
तेन बहुव्रीहिः सम कथं शौ लक्ष्ण नाम्नगे किरातबाणेषु वृत्तिरास्था कथं स्थितात कथं विदित्य
र्थः । अतो नापहारशंकाकार्येति भावः ॥ १० ॥ यदुक्तं स्मयते तत्तु भृतां मित्यादिना सदावादः

3

प्रमाणमिति तत्रोत्तरमाह॥ यदीति॥ यदि आर्यत्वे स्थितं सच्चरितं प्रमाणं तत्संमुखेनांगीकृतय
दीत्यर्थः॥ तर्हि अदोषे पिदोषाभावेऽपि किल प्रसज्यप्रतिषेधे नञ्समासं निमाष्यकारः॥ उपल
सतोऽत्र नीया। वयं किंमिति निरस्कृताः नयुक्तमित्यर्थः॥ हि यस्मात्कारणात् सतां सत्पुरुषाणां
वाणी वाक् गुणमेव भाषते न तु दोषं॥ अतस्तेन मृषा दोषं भाषते न सदाचार प्रामाण्यं बुद्धिरि
त्यर्थः॥ किंलक्षणा वाणी परिवादगोचरं परिनिंदास्पदं अयातनपूर्वा पूर्वं न याता अयाता पू
र्वा॥ सुप्सुपेति समासः॥ परत्वात्सर्वनाम्नोपि नियार्थाः पूर्वनिपातः स्त्रियाः पुंवद्भाषि
तापुंस्कादनूङ् इति लिंगता। अर्थांतरन्यासोऽलंकारः॥ २१॥ ननु अप्रसन्नाबुद्धिः कथं दुष्टेति नि
श्चयते तत्राह॥ गुणेति॥ वागसिः वागेव वाचैव असिः खड्गः असाधोर्हृदयं हि मा सत्येव विद्य
मानो ति दुष्टया वाचैव नसूचिकाया बुद्धेरपि दौष्ट्यमनुमियत इति। किंभूतस्य असाधोः गुणाप
वादेन विद्यमानगुणाच्छादनेन दस्यरोपतोः तत्तुल्यो अन्यदोषस्यारोपतोः अविद्यमानस्य दो
षस्य आरोपतोऽस्य समर्थं तसंज्ञं तं साधुं भ्रष्टाधिरूढस्य अतिमात्रमाक्रम्य स्थितस्य अभिहि
तस्येत्यर्थः कर्तरि क्तः॥ पुनः किंभूतस्य निगंरूढयं निगूहतः सद्भावतोपि आच्छादयतोपीत्यर्थः
असाधोरनार्यस्य हृदयं कर्म वागसि॥ कर्तृ॥ किंलक्षणो वागसिस्फुरन्॥ विलसन् अति

व्रतस्थे ग्रानेरित्यनेन सुखेकारित्वं सुविततवायोरित्यर्थः॥ किंलक्षणाः गैत्रः ग्रेताएव गैत्रः गयन
नीलः अनुकूलः इत्यर्थः॥ अथ तेस्तूनं नातप्रमादित्वस्यार्थः अविगास्य यः पुनः किंलक्षणाः त
रंगितालं वितकेतु संततिः तरंगा संज्ञाताः तरंगितं यथा तथा आलिंगिताः अवयक्ति ताकेतुसं
तयो ध्वजा समूहाः परंपरायेन सः पुनः किंलक्षणः सघनांबुसीकरः घनास्थितेसं राग्धते अंबुसी
कराच्चतैः सह वर्तते इति सघनांबुसीकरः एतेन ग्रीतः सुरस्मिरिति सुरमितरंगितेति माघ
त स्त्रसूते। रणाय संग्रामाय त्वरां प्रदिशन्निव त्वरयन्निव रणार्थं बलानि बलं त्विति लोके वि
कस्मैचिद्वाक्यार्थकं विष्णुरूपं त्वरयत्र कश्चित्पुरुषश्चलतिरति ध्वनिः॥ २८॥ जयेति॥ ग्रामस
स्यातलवोरणाद्ध निशरासनस्य धनुषः स्यानां गुणानां तलवारणानां स्याघातनवारणानां वध्व
निः शब्दः अवस्तरे॥ आशाः स्यानशे॥ सतस्य संयोगादेगुणाः किंलक्षणो ध्वनिः॥ जयारवक्ष्वेडित
नादमूर्छितः जयेति रवः मंगलपाठकानां जयेति शब्दैः क्ष्वेडितनादैः सिंहनादैश्च मूर्छितो व
र्धितः पुनः किं कवत् भूधरराजकुक्षिषु भूधरराज्ञो हिमाचलस्य कुक्षिषु गुहासु असंभवत्प्र
मायत्र अवकाशं अलभमानः अतएव भुवं प्रकंपयन् बलानां बाहुल्यं गम्यं। अत्र मूर्छापदस्य स
विषणागस्या असंभवहेतुत्वात्काव्यलिंगरूपं गिरिकुक्षिरूपाधेययावद्धुरनेराधेयस्याधिक्योक्तिः
अधिकालंकारानाभ्यां च यम संभवति संगतकं नियोत्थाप्यमानानुपात् नमूर्छा गुणानिमित्ता प्रती

यमानाक्रियास्योत्सेकात् अंगानि भावेन संस्कार्यत इति संबंधः॥ २७॥ निशीतिा रश्मिवतः म-
रीचिभिर्वने सदां हेतिषु विभुस्फुरे॥ रश्मिवतः श्रीसूर्यस्य मरीचिभिः किरणैः वने सीदंति वने
सदोषा नेचराः तेषां हेतिषु आयुधेषु विभुस्फुरे स्फुरितं बाभारे प्रतिफलितमित्यर्थः॥ स्फु-
रते र्मोवै लिट्॥ किंभूतेषु हेतिषु निशातरोचिषु निशाम्नि [illegible] शरोचिष्य येषां ते निशातरोचिषु वि-
षणायोरन्यतर विषयत्वं विवक्षायामिश्रत्वाद्विषेण समासः वने सदामिति॥ मतम्॥ विषसादिनां क्रिप॥
तत्स्वरूपे बाहुलमित्यलुक्॥ हेतिष्वायुधेषु हेतिशब्दोपि नस्त्रियोरिति केशवः॥ किंभूतो मरीचिभि-
र्भिन्नविग्रहैः भिन्नाः संक्रांताः विग्रहाः मूर्तयो येषां ते तैः अत एव विकाससंगतैः विस्तारं गतैः
अत एव ककुभां दिशां अंतरं मध्यं प्रदीपयद्भिरित्यस्यैव सा॥ अंशुमतः श्रीसूर्यस्य माडुपधाया मस्म
मिमीतोर्वी यवाविन्मरति मतिमकारः॥ मानुक रोमशीय स्त्रीपुंसयोः ककुद्दीधितिः स्त्रियामित्यमरः
वने सदां हेतिषु भिन्नविग्रहैरिति योज्यं॥ ३०॥ तहुर्हेति॥ विभुर्भवौ विभुर्व्यापकः सनातनो नदाव-
मौस्त्रे मे॥ तदेति शेषः किंभूतः तहूर्तवसस्थगितैकदिङ्मुखः॥ तहूर्हे प्रत्न नर्मवसासारुदयेन
स्थगितं मास्छादितं एकं अन्यतरं दिङ्मुखं आशामुखं येन सः विशालवसारस्यर्थः पुनः किं लक्षणः वि-
मष्टविस्फारितचापमंडलः विमष्टं अत एव विस्फारितं निर्घोषितं चापमंडलं धनुर्मंडलं येन सः॥ किं-
भूतो आयतं प्रसृतं सर्वत्र प्रविकीर्णं पक्षद्वयं विततं विस्तार्य समहिम्ना व्याप्येत्यर्थः॥ पक्षः साध्यम

रूपस्थसानायनलमित्रिषु इति विज्ञ यंती॥ अत्र बलसेनां पार्श्वद्वये विन्यस्य आगच्छती तियोज्यं तत्रैव
निगणानां प्रमथगणानां मध्यस्थोपि परीवास्थितः सर्वाभिन्नभोनथाल्पक्षित इत्यर्थः॥ जप्रेहालंकारः
॥३१॥ सुखेष्विति॥ वनं माबभौ॥ सुषुमेकि भिरोत्सेदाते॥ निरुद्धश्वासमिव निरुद्धप्राणमिव ॥ जप्रेहा-
लंकारः किं लक्षणं तां वनं गतैः प्रमथादिभिः गतैः अवच्छेदनिरुद्धं अवच्छेदेन गमनेन निरुद्धं आवृतं अत
एव आकुला आकुलं आकुलप्रकारं प्रकारगुणवचनस्येति द्विर्भावः॥ किंलक्षणैः गतैः सुखेषु दुर्गेषु
च सुखेन गच्छंती ति सुखाः प्रदेशाः दुःखेन गच्छंति ति दुर्गाः प्रदेशाः समविषमप्रदेशेष्वित्यर्थः॥ सु-
दुरोर धिकरणार्थे डो वक्तव्यः॥ अत एव टिलोपः अल्पविक्रमैः अल्पः विक्रमः पराक्रमो येषां ते तैः॥
शरीरलाघवात् विषमस्थले समसंचारैरित्यर्थः तथापुनः किंभूतैः जवादहंपूर्विकया यियासुभि-
र्यातुमिच्छुभिः जवाद्वेगेन अहमहमिकया अहंपूर्वमहंपूर्वमित्येहंपूर्विका क्रियारस्यर्थः मरः॥
यियासुभिः यातेः सन्नंतात्प्रत्ययः॥ मनोज्ञादित्वाद्वुञ्प्रत्ययः॥ पृषोदरादित्वात् हृष्भावः॥
॥३२॥ तिरोहितेति॥ भूवः भूमयः स्तनंमागनिम्नतया भेजिरे सेविता निम्नतया दृष्टा इत्यर्थः
किंलक्षणाः किरातसैन्यैः तिरोहितस्वनिकुंजरोधसः तिरोहिता निरुद्धा नानिम्नत्वानि गर्तप्र-
देशाः निकुंजरोरोधांसि वृक्षतटानियासां ताः अत एव सहसां अतिरिक्तां गतानतां समस्थवानः

प्राप्तवत्यः किरातसैन्यैः यामुनः आश्रहेघरे विमाः दिक्षिसताः सतां निम्नतयागं भार्येण अधिभावमै
नीरसव प्राप्ताः इव स्फ्रेक्षा॥ अयमर्थः किरातसैन्यैः यामुनो व्याघ्रास्ता गच्छताः प्रतीयन्तेते सैन्यै
मुक्ताः सा एव निम्ना प्रतीयन्ते इत्यर्थः॥ ३३॥ पृथूरतिगणा विपानां गणश्रेष्ठानां संहतिः संघनतिः
पृथव स्थूलतरवश्च पृथूरुतिः पर्यस्ताः क्षिप्ताः वृक्षस्य लतानतयोयया सा पृथूरुपर्यस्तवृक्षलतानति
पुनः किंलक्षणा। जवानिलाघूर्णितशालचंदना जवा क्षात्रो निलः जवानिलः वेगमारुतः तेन घू
र्णिताः भ्रामिताः शालाः सर्जतरवः चंदनानि यया सा जवानिलाघूर्णितशालचंदना प्राकार
दृश्चीयो शालः शालः शालः सर्जतरुः स्मृतः इति त्रिकाण्डः। पुनः किंलक्षणा। परितः प्रसारिता स
र्वत्र गामिनी तस्य सालंकारः॥ ३४॥ अथाष्टभिः श्लोकैः रघुनं विशेषयन् गणानां नदमियोगमाह।
ननदन्ति॥ गणाः अनिलवाग्निनं समासेदुः रिति क्रियाकारकसंबंधः। किंलक्षणं। अनिलवा
ग्निनं। सदर्पं दर्पेणसह वर्तते सदर्पस्तं सांतसारं पुनः किंलक्षणं तपस्यया तनूं तपस्यया प्रतनुं
तनूं तपस्यतेक्यबंता स्त्रियामप्रत्ययेटाप्॥ अतएव मदश्रुत्या मदश्रवणेन सामं एकमौरण
मिवमुख्यते गजमिव स्थितस्य कपमा॥ हयोमरुति निष्ठां तरकस्य मकारः एक वारितां एकाकि
किनं वारणमिव॥ पुनः किंलक्षणं। भूभृतां राज्ञां निघ्ननाय नाशाय परिज्वलंतं अतएव दिग्गोद

हतं जातवेदसमिव स्थितमिस्युपमा। जातवेदाः अग्निरपि भूभृतः पर्वतान् ज्वलयन् दिग्गोद हतीति।
३५॥ अनादरोपात्तेति। पुनः किंलक्षणं अनिलवाग्निनं अनादरोपात्तधृतैकसायकं। अनादरेण हेलया
अगणनया उपात्तो निषंगात् गृहीतो धृतश्च एकः सायको बाणो येन तं अनादरोपात्तधृतैकसाय
कं॥ पुनः किंलक्षणं अनूकूलजयेस्पृहं। जयमिच्छंतमित्यर्थः कस्मिन्निव अनुकूलेसुहृदीव मि
त्रे इव पुनः किंलक्षणं बलोदधौ बलं दधिरिव बलोदधिः तस्मिन्नयने दृष्टीबलोदधिरिस्युपमि
तसमासः निवेशयंतं। किंलक्षणे बलोदधौ॥ अपूर्णप्रतिकारपेलवे अपूर्णः प्रतिकारो हरणं प्रत्युपेत
तुपोयस्य सः अतएव पेलवो लघुः तस्मिन् अपूर्णप्रतिकारपेलवे तदकस्पदादेशः॥ ३६॥ निषण्णे
ति॥ पुनः किंलक्षणं आपत्प्रतिकारगौरवासने निषण्णं स्थितं॥ आपदां प्रतीकारः क्रियातस्य कार
णं हेतुस्तस्मिन् गौरवासने धनुर्गुणिवन्नमानं कस्मिन्निव धैर्यस्य धैर्यमपि आपत्प्रतिकारणं म
नति धैर्यवता आपन्नीर्यतरस्यर्थः। किंलक्षणे गौरवासने अनपायिनि अपायरहिते नाशरहिते॥
धैर्यमपि अनपायि। पुनः किंलक्षणं प्रशांततो स्थितं निर्विकारं अपि अतएव अलंघनीयं निष्कंपं
आपगानां पतिमिव स्थितं उपमा। वातावश्रया वाता निःस्वनः॥ ३७॥ उपेयुषीति॥ पुनः किंलक्षणं अंत
कस्य प्रकृतिं अंतकस्येव प्रकृतिस्तां बिभ्रातां किल लक्षणां प्रकृतिं अदूरे समीपे पतितस्य दृष्टिः तावधाहूतेन युषी
प्राणां दृष्टिः तः वाह्यादियादिनिः पुनः किमिव स्थितं पशूनां पतिमिव रुद्रमिव स्थितं। किंलक्षणं पशुप

3

आत्मानं गोपायेदिति शङ्कते तात्पर्यार्थेर निवेन्तेस्याह । दातुमिति ॥ हे अंग आपत्प्रदर्शी दातुमेव न हं
तुमेव न हंतुं मुनिर्त्यादिति भावः । हतोपि योग्यः । सन्नपि किं किमर्थं मृगे विशिखं न्याली विन्त्राः
निवेशितवान् ॥ विश्रान्ते र्पं ना ह्नुड्ड ॥ अभिधावतो मृगात् अपमारतो निव आत्मरक्षणोक्त न्नेयद
वरधीतरतश्चापलमेव न हिंस्यादिति निषधादिति भावः । एत हिंसं प्रतीदानीमधुना सांप्रतं तथा
इत्यमरः ॥ ६५ ॥ किं बहुना परमार्थतः श्रूयतामित्याह ॥ सज्जन इति ॥ हे अंग त्वं सज्जनोसि
अतश्चापलं । चपलस्य कर्म चापलं विहाय हि । न हतेस्तु ॥ आवत्ताविति इकारः । सवद्दार्क इव
वा को वा सहिष्यते इव शब्दो वाक्यालंकारे । वा शब्दो अनवधारणे ॥ असहने कारणमाह अभि
भृताश्चपलाः पुनः पुनरकार्यकारित्वात् युगांतवायवः वारिधीनिव क्षोभयंति । किंभूतान् गुरून्
अपि विश्रुतान् अपि । उपमा जातिरर्थांतरन्यासः ६६ ॥ न च वयं किरात तु स्मिता किं करिष्यति तत्रा
ह ॥ हे अंग त्वं इति मावज्ञीगणः इति मा ज्ञानीहि वनेचरबुद्ध्या मावज्ञासीरित्यर्थः । युज्ञातिकिं
अपि च भूपतिः पार्वतीयः पर्वते भवः पार्वतीय इति किंविधः । अस्त्रविदविद्वत् । अस्त्राणां शास्त्र
वेदः विधानं वेत्तीति विद्वत् । निग्रहसमर्थ इत्यर्थः । नतु इह शब्दे किमिति वनेवसति तत्राह ॥
गोपितुमिति । मनुष्याणामितीता अनुनीय प्रार्थ्य नीलवासं लेभित । प्रापितः । किं कर्तुं इमां गां गुरुं गो

3

गोपितुं रक्षितुं ॥ मावज्ञीगणाइति गणायेते लुङ् इयगणाइतिकारः । गोपितुमिति आयादय आर्धधा
तुके वेति विकल्पाद्गुपूधूपसादिना आयादेशः । लंभित इति ण्यंतो कर्तृकष्ठकर्मणा इति वचना
त् ॥ अत्र णौ कर्तरि कर्मणीति क्तः । गतिबुद्धीत्यादिनापि कर्तृकर्मत्वं ॥ ६७ ॥ उपसंहरति । त
दिति ॥ वसूपतिरिति वचोऽवबोधवत् । इतीति किं ॥ तत्तस्मात् मुनिचापलात् मुनेः संबंधि
इदं मृगवधादिति निन्दितं । सोढमिति । शास्त्रोहस्य तु प्रसर्पणमेव प्रतीकार इत्याह ॥ ते
मपि सर्वसंपदः आप्नुहि ॥ सुखेनेति भावः । किं कुर्वन् । अत्रभवते पूज्याय मह्यं सख्यामित्रतां अ
त्रमव छायाख्यातः । निजबाणं दिशन् प्रसर्पयन् । आश्लिष्टोद् ॥ ६८ ॥ ननु मम सख्यमेव नरो
वते किंभूतन्नस्मन्मूलाः संपदस्तत्राह । आत्मनीनमिति । आत्मनीनमिति । आर्यसंगमे अर्थि
ता अपेक्षा कथमिव मामस्मान् भूत । सर्वदा भवस्येव । किंभूते आर्यसंगमे इति अनेकफलम
जि अनेकानि फलानि मंगतेरिति अनेकफलभाजि रतीति किं तदाह ॥ आत्मनीनमिति
आत्मनीनं आत्मने हितं आत्मनीनं ष्वजनभोगोत्तरपदात्ख प्रत्ययः । उपतिष्ठते संगच्छ
ते । उपादेयं पुष्पसंसर्गकरणमिव पेक्षितेव कक्ष्या दात्मनेपदं ॥ गुणाविनादयः संप
ते ति । आपदस्थे विरमंति । व्याङ्परिभ्यो रमः इति परस्मैपदं ॥ इत्यनेकफलभाक् ॥ ६९ ॥